International Journal of Applied Research 2022; 8(1): 407-410



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2022; 8(1): 407-410
www.allresearchjournal.com
Received: 10-11-2021
Accepted: 14-12-2021

**वन्दना कुमारी**
डी–34, रोड नं०– 5, न्यू आनंद
किशोरी नगर, लक्ष्मीसागर, दरभंगा,
बिहार, भारत

**Corresponding Author:**
**वन्दना कुमारी**
डी–34, रोड नं०– 5, न्यू आनंद
किशोरी नगर, लक्ष्मीसागर, दरभंगा,
बिहार, भारत

# प्रसन्नराधवकारस्य परिचयः

**वन्दना कुमारी**

**सारांश**
भारतीयप्राचीनपरंपरायां कवयो विद्वांसश्च स्वकीयजन्मस्थान–आविर्भावकाल–वंशपरिचयादिविषये प्रायः नीरवतामवलम्बन्ते। सुखस्य विषयोऽयं यत् जयदेवः गीतगोविन्दस्य तृतीयसर्गे स्वीयजन्मस्थानस्य नाम घोषयन्ति, यथा–'वर्णित' जयदेवकेन हरेरिदं प्रवणेन, किन्दुविल्वसमुद्रसम्भवरोहिणी–रमणेन। जयदेव आत्मानं ''किन्दुविल्वसागरसम्भूतचन्द्र'' इति घोषयति। चतुर्दशशतके आविर्भुतः गीतगोविन्दस्य ''सर्वांगसुन्दरी'' टीकाकारः कविराजनारायणदासः विद्यते!

**कूटशब्द :** प्रसन्नराधवकारस्य, भारतीयप्राचीनपरंपरायां, किन्दुविल्वसागरसम्भूतचन्द्र

**प्रस्तावनाः**
''किन्दुविल्वाख्यं शासनं तच्च महत्त्वात् समुद्रत्वेन रूपितम्। किन्दुविल्वसमुद्रसम्भवश्चासौ रोहिणीरमणश्चेति कर्मधारयः। अन्यकुलोद्भूतस्यान्यकुलोन्नति – कारकत्वदर्शनात् सम्भवशब्दोपादानम्। तत्कुलोत्पत्तिकताख्यापनार्थः दृष्टान्तोऽत्र युधिष्ठिरः, तदेवं किन्दुविल्व– शासनाज्जातस्तस्यैवोन्नतिकारको यथा सागराज्जातश्चन्द्रः सागरवृद्धिकारक इत्यर्थः संपद्यते।[1] विशालं किन्दुविल्वशासनं समुद्रेण तुलनीयम्। सागरजातश्चन्द्रः सागरश्रीवर्द्धकस्तद्वत् जयदेव स्वकीयजन्मभूमेः गौरवमवर्द्धयत्। श्रुतिरञ्जनीटीकायां किन्दुविल्वं ''तिन्दुविल्व'' मित्युक्तम्, ''तिन्दुविल्वो नाम जयदेवस्य जन्मवंश इति केचित्।[2] तत्र न शासनं ग्रामो वा, अपि तु वंशः इत्यर्थः सूचितः मातृकाद्धये ''केन्दुविल्व'' शब्दः प्रयुक्तः। मिवारस्य राणा कुम्भकर्णः 1440,1460 ए.डी.। तदीय– 'रसिकाप्रिया'' टीकायां किन्दुविल्वस्यार्थः शासनं– निवासः ग्रामो वा इति कृतवान्, यथा–
''किन्दुविल्वं तच्छासनं निवासो वा ग्रामः समुद्भवः, तच्छम्भवरोहिणीरमणे नेव चन्द्रेणेव।''[3]
मैथीलपिण्डतः चन्द्रदत्तः तस्य संस्कृत ''भक्तमाला'' ग्रन्थे जयदेवः पुरीनिकवर्त्तिनि किन्दुविल्वग्रामे अजायत इति विलिखति।

''जगन्नाथपुरीप्रान्ते देशे चैवोत्कलाभिधे।
किन्दुविल्व इति ग्रामो ख्यातो ब्राह्मणसंकुलः।।
तत्रोत्कले, द्विजो जातो जयदेव इति श्रुतः।
विद्याभ्यासरतः शान्तः पुरूषोत्तमपूजकः।।
निर्माय गीतगोविन्दं पुस्तकं पुरूषोत्तमे।
निवेद्य कृतकृत्योऽभूज्जयदेव महामना।।[4]

मैथिलपण्डितः केशवमिश्रः ''अलंकारशेखरः'' ग्रन्थे 1563 ए.डी.। आचार्यगोवर्द्धनस्य एकः श्लोकमुद्धृत्य जयदेवः उत्कलवासी आसीदिति प्रमाणी करोति, यथा–

''प्राक्प्रत्यक् पृथिवीभृतः परिषदि प्रख्यातसंख्यावता
महनायातभूत– र्क–कर्कशतया विच्छिद्य विद्यामदम्।
ये केऽप्युत्कलभूपते तवसभासम्भाविताः पण्डिताः
पत्रं श्रीजयदेवपण्डितकविस्तन्यमूद्धिर्नं विन्यस्यति।।

गदाद्विवेदि 1553–54 विरचिते ''संप्रदायप्रदीपग्रन्थे''[5] जयदेव उत्कलीय इत्युल्लिखितः। डा.भि. राघवन्– डा.भि. वरदाचारी–परशुरामचतुर्वेदी च जयदेवस्य उत्कलीयत्वं प्रमाणी कुर्वन्ति।

खीष्टीय 1304 अब्दे रचिते ''प्रबन्धचिन्तामणि'' ग्रन्थे लक्षणसेनस्योल्लेखोऽस्ति। परन्तु जयदेवस्तस्य सभाकोविकद आसीदित्ययुल्लेखो नास्ति। जयदेवः तीर्थवासी पण्डित इति चित्रितः वस्तुपालः तीर्थपर्यटनसमये समस्यापूर्त्तौ कृताकार्यतौ सोमेश्वरदेव जयदेवं च। प्रसिद्धपण्डितद्वयं यथाक्रमम् अष्टसहस्र–चतुः सहस्रमुद्राप्रदानेन सम्मानितौकृतवान्, इत्युल्लेखस्तत्र विद्यते।

वंगदेशस्य वर्द्धमानान्तर्गते अजयनदीतटे केन्दुविल्वग्रामे या 'जयदेवमेला' अनुष्ठीयते तद्विषये ''मादलापाञ्जिग्रन्थे' प्रमाणं लभ्यते, यथा वर्द्धमानकीत्ति 'चन्द्रमा महाराजः पुरी मार्कण्डेश्वरपुष्करिणीनिकटे एकस्मिन् मण्डपे तस्येष्टदेवस्य राधाविनोदस्य विग्रहं संस्थाप्य 1741 ए. डी. अब्दसमये तत्र गीतगोविन्दपाठस्य व्यवस्थां कृतवान्। अत्रैव निम्बार्कसम्प्रदायस्य वृन्दावनवासी श्रीराधारमणदेवः मठमेकं निर्मितवान्। अनेन सम्प्रदायेण मकरसंक्रान्तौ अजयनदीतटे 18 शतकस्यान्तिमभागे एका मेला प्रारब्धा। परन्तु जयदेवः तत्र जन्म लेभे इति तन्मेलया न सिद्धयति।

ततः बहुवर्षपूर्वं, 1550 खीष्टाब्दे जुलाइमासस्य 8 तारिकायां आषाद शुक्ल दशमी बुधवासरे श्रीजगन्नाथस्य 'वाहुडा' यात्रावसरे श्रीमन्दिरे केवलं गीतगोविन्दगानार्थं गजपतिप्रतापुरद्रदेवस्य अभिलेख. उत्कीर्णः। अनेन उत्कलीयः जयदेवः उत्कलगजपतिना सम्मानित इति ज्ञायते।

राजस्थानस्य प्रसिद्धरामभक्तकविः नाभाजी 1585 खीष्टाब्दे तस्य हिन्दीभाषारचिते ''भक्तमाला'' ''ग्रन्थे जयदेवस्य जन्मस्थानविषये एवं लिखति यथा–'' ''किन्दुविल्वग्राम, तामै भय कविराजराज, भख्यो रासराज हिये मन मन चाखिये दिन दिन प्रति रूख रूख तर जाइ रहैं, रहैं एक गुदरी, कमंडलका, राखिये। कही देवै विप्रसुता जगन्नाथदेव जूकों, भयो जवि ससे चल्यो जैनप्रभुभाखियै। रसिक जैदेव नाम मेराइ सरूप, ताहि देवै ततकाल अहो, मेरी कहि साखियै।''

अस्य ग्रन्थस्य परवर्त्तिपद्यावलीषु महाप्रभुजगन्नाथादेशेन जयेदवः पद्मावत्तीं परिणीतवान्, श्रीक्षेत्रे उषित्वा गीतगोविन्दं रचितवांश्चेति वर्णितम्।

''भयो जू प्रगटगीत सरसगोविन्द जूको, मान में प्रसंग सीसमंडन सो। को। दीजियो।''

पुनश्च–पुरीराजरचितगीतगोविद–जयदेवरचितगीतगोविन्दयोः किं प्रियतरं श्रेष्ठं वाङ्स्यजगन्नाथकर्त्तृकपरीक्षा, राज्ञः पराजयः आत्महत्यानिर्णयः, महाप्रभोः आदेशात् राज्ञः द्वादशश्लोकानां श्रीगीतगोविन्दस्य द्वादशसर्गेषु सन्निवेशनप्रभृतयश्च नाभाजीमहोदयेयन वर्णिताः।

नाभाजीरचितभक्तमालग्रन्थस्य टीकाकारः सन्थप्रियादासः टीकायां जयदेवः पुरीगजपतिनरेशात् प्रत्यावृत्य किन्दुविल्वमागवान्निति उल्लिखति, यथा–

''करि समाधान, निजग्राम आए किन्दुविल्व, जैसो कच्छु सुनयो यहपरचैलैगायो है।

महाराष्ट्रस्य सन्थकविः महीपतिः खीष्टीय 1762 अब्दे ''भक्तविजय नाटकं'' रचितवान्। तत्र पुरीनिकटवर्त्तिनः तिन्तुविल्वग्रामस्य नाम, राजरचित अभिनवगीतगोविन्दापेक्षया जयदेवस्य गीतगोविन्दे जगन्नाथस्याधिकप्रीति, राजरचितचतुर्विंशति श्लोकानां जयदेवस्य गीतोगोविन्दे संयोजनं च वर्णितानि, यथा–

''जगन्नाथक्षत्रा समीपजाण, तिन्दुविल्व ग्राम नामाभिधान,
ब्राह्मणवंशी अवतारपूर्ण, तेथें घेडला श्रीव्यासे।[6]
वंगीयवैष्णवकविः कृष्णदासः 18श शतकस्य

मध्यभागे तस्य 'वंगला' भक्तमालाग्रन्थे 1712 ए.डी.। जयदेवस्य जन्मस्थानं केन्दुविल्वग्रामः श्रीपुरूषोत्तमक्षेत्रस्य निकटवर्त्तीति स्वीकरोति, यथा–

''केन्दुविल्व नामे ग्राम सागरहइते,
श्रीमान् जयदेव द्विजहइल विदिते।
जयदेवमहाशय महान मानुष,
श्रीपुरूषोत्तमक्षेत्रे वृक्षलते वास।।[7]

आसामस्य कामरूप ''संप्रदायकुलदीपक'' ग्रन्थे आन्ध्रस्य मल्लादि सूर्यनारायणशास्त्रिणः ''संस्कृतकविजीवनी'' ग्रन्थेऽपि जयदेव उत्कलीय इति उल्लिखितोऽस्ति। उत्कलीयकविः रामदासः बहुभक्तजीवनीसम्वलित ''दाढ़र्यता भक्ति'' ग्रन्थं भागद्वयेन 1768.69 ख्रीष्टाब्दे 1799.1800 ख्रीष्टाब्दे च रचितवान्। तत्रापि जयदेवस्य जन्मस्थानं केन्दुविल्वग्राम इति लिखितोऽस्ति। यथा–

''जनमकेन्दुविल्वग्रामे, ब्राह्मणजयदेव नामे।
महापण्डितविष्णुभक्त, जित इन्द्रिय सुविदित।
विरक्त निःसंग उदासी, श्रीक्षेत्रे परवेश आसि।
एकवृक्षर तले थाइ, श्रीजगन्नाथंकु सेवइ।
रचिला अपूर्वप्रबन्धा, नाम या श्री गोतगोविन्द।
शुणन्ति आजि याए नित्य, त्रिकाले याहा जगन्नाथ।''[8]

माधवपट्टानायकस्य 1535 खीष्टाब्दे रचित ''वैष्णवलीलामृतग्रन्थे जयदेवस्य जन्मस्थानं पुरीमण्डलान्तर्गतप्राचीनदीतीवर्त्तिकेन्दुलीशासनमिति उल्लिखितम्, यथा–

''विप्र से जयदेव नाम, क्षेत्रवरकु आगमन।
केन्दुलीशासन ता ग्राम, प्राचीनदीरे तटे पुण।
श्रीनीलामाधवसमीपे, भक्तिकलासे नानारूपे।
गीत से रचिवि वोइला, क्षेत्रवासकु मनदेखा।''

कलिकतास्थित–' एसिआटिक्सोसाइटि इत्यस्य प्रतिष्ठातृसभापतिः इरेजगवेषकः सार् उइलिएम् जोनस् 1784 ख्रीष्टाब्दे गीतगोविन्दे व्यवहृतौ रागतालौ दक्षिणभारतप्रचलितौ इति अनुमनुते।

'The notes of the Gitagovidna must exist in any where is one of the Southern provinces, where the poet was born.

तस्य गीतगोविन्दप्रबन्धे ''केन्दुली'' कलिगेऽवस्थिता इति स सूचयति।

"Gitagovinda, it was the work of Jayadeva who flourished it is said before kalidasa and was born as he tells himself in kenduli, which many believe to be in Kalinga."

महाप्रभुश्रीचैतन्यः श्रीक्षेत्रावस्थानसमये स्वरूप रायमानन्दाभ्यां चण्डीदास विद्यापत्योः वैष्णवपदावली, रामानन्दस्य जगन्नाथवल्लभनाटकं, विल्वमंगलस्य श्रीकृष्णकर्णामृतं जयदेवस्य गीतगोविन्दं च आकर्णयति स्म।[9]

''विद्यापति जयदेव–चण्डीदासेर गीत, आस्वादेन रामानन्द, स्वरूपसहित''[10]

''चण्डीदास, विद्यापति, रायेरनाटकगीत, कर्णामृत, श्रीगीतगोविन्दे। स्वरूप– रामानन्दसने महाप्रभुरात्रिदिने गायशुने परम आनन्दे। ''मध्य स्य परच्छिेदः।

''विद्यापति, चण्डीदास, श्रीगीतगोविन्द, भावानुरूपश्लोकपढ़ेन राय रामानन्द।[11]

कलिकता विश्वविद्यालयस्य अध्यापकानां आशुतोष – भट्टाचार्यमहोदयानां मतेन ''जयदेव छिलेन उडिया एवं वीरभूमेर केन्दुलीये अनुष्ठित वात्सरिक मेला आसले वाउलमेवा एवं जयदेवेर जन्मेर संगे एक कोनो सम्पर्क नेई। जयदेव लक्ष्मणसेनेर सभाकवि छिलेन वले ए यावत् सिद्धान्त विदग्धसमाजे गृहीत हयेछिल या ग्रहणयोग्य नय। लक्ष्मणसेनेर अन्यान्य कविदेर नामेर संगे कवि जयदेव निजेर नामके युक्तकरिले ओ तिनि लक्ष्मणसेनेर सभाकविछिलेन, ता प्रमाणित हयना। प्राचीन यशस्वी संस्कृतविदेर नामेरसंगे निजेर नाम युक्तकरार रीति एखनो उडिष्याय प्रचलित रयेछे।''[12]

डा. सुकुमारसेन्महाशयस्य मतेन जयदेवस्य केन्दुली आडिशायाः प्राचीनदीखीवर्त्तिनी केन्दुली भवत्येव–

''उडिष्याय पुरीर अनतिदूरे प्राचीनदीर धारे केन्दुविल्वग्राम आछे। मने इइते पारे ये गीतगोविन्देर गाढ आदिरस उडिष्यार मन्दिरेर एक धरणेर स्थापत्यशिल्पेरइ प्रतिफलन, सुतरां जयदेव उडिष्या निवासी इ हइवेन्।''

पण्डितश्रीकुलमणिश्रिः, पण्डितश्रीभागवतप्रसादत्रिपाठी, गवेषकः श्रीकेदारनाथमहापात्रः डा. भगवानपण्डा अन्ये च विद्वांसः जयदेवस्य केन्दुविल्वग्रामः ओडिशाप्रदेशान्तर्गतः पुरीमण्डलस्य वालिअन्तानिकटवर्त्ती प्रतापरूद्रपुरग्रामपञ्चायतस्य ''केन्दुली'' इति प्रमाणीकुर्वन्ति।[13] प्राचीनदीतीरवर्त्ती ग्रामोऽयं भुवनेश्वरात् उत्तरपूर्वदिशाः। ग्रामेऽस्मिन् 'केन्दुविल्व' वृक्षाणां बाहुल्यात् एवं नामकरणमभूत्। उत्कलेषु ''केन्दुझर'' केन्दुपाट'' ''केन्दुखुण्टा'' ''वेलगाँ'' ''वेलसरा'' वेलपडा'' प्रभृतीनि ग्रामनामानि बाहुल्येन सन्ति। उत्कलसरस्वतीस्वरूपाः पुण्यतोयाप्राचीनद्याः तटे तटे शिवलिंगानां। अएवत। विल्ववृक्षाणां च प्राचुर्यस्य साद्भाव्यं कपिल संहितातः प्रमाणितं भवति, यथा–

''क्रोशे क्रोशे च लिंगानि तटे तस्या मनोरमे।
सर्वत्र सुखसञ्चारे विद्वज्जनसुसेविते।।''[14]

जयदेवस्याविर्भावकालेऽस्मिन् अञ्चले बहुब्राह्मणशासनानि। ग्रामाः शिवालयाः, माधव। विष्णु मन्दिराणि प्रतिष्ठितान्यासन्। ''मन्दिरस्य देशस्य'' उत्कलस्य भव्यवर्णना शोभनेश्वरमन्दिर मेघेश्वरमन्दिराभिलेखयोः लभ्यते। अभिलेखद्वयस्य रचयिता जयदेवस्य बन्धुः गीतगोविन्दस्य प्रथमटीकाकारः कवीन्द्रः उदयनाचार्यः। प्रथमशिलालेखे ने– (नि) आलीशासनस्य, द्वितीयेऽभिलेखे एकाम्रशासनस्य भुवनेश्वरस्थस्य ब्रह्मपुरस्य माहात्म्यं वर्णितम्। किन्दुविल्वग्रामः उपर्युक्तशासनद्वयमध्यवर्त्तिभागे अवस्थितः।

केन्दुलीग्रामे सोमवंशशासनकालनिर्मितस्य देवीमन्दिरद्वयस्य, एकस्य शिवमन्दिरस्य च ध्वंसावशेषो विराजते। तन्मध्यात् अम्बिकामन्दिरस्य प्रवेशद्वारदेशे नवग्रह ''पाट'', नवग्रहनिम्नभागे वामे जयदेवकृतगीतगोविन्दस्य ''श्रितकमलाकुचमण्डल'' इति गीतस्य'' जय जय देव हरे'' इति पंक्ति खोदिताऽस्ति। लेखस्यान्तिमभागे लिखितमंकचतुष्टयं 1102 अथवा 1112 इति रूपेण पठितम्। समयसूचकमंकचतुष्टयं शकाब्दमतः+ (78) 1180 अथवा 1190 खीष्टाब्दं सूचयति। जागेश्वरीमन्दिरस्य ''पाट'' प्रस्तरे क्षुद्राभिलेखः आविष्कृतः, परन्त्वेषः पठनयोग्यो न भवति। मुक्तेश्वरशिवमन्दिवेढ़ा। परिसर। तः क्षुद्रमाधवमूर्त्तिद्वयमुपलब्धम्। अम्बिकायाः चमत्कारकारिमूर्त्तिः हास्यमयी लास्यमयी च। मूर्त्तिरीयमनुपमसौन्दर्य–श्रीसम्पन्ना। अम्बिकासदृशी द्विभुजा जागेश्वरीमूर्त्तिः चित्ताकर्षिका। माधवविग्रहद्वयोरेकः चतुर्भुजः, शंख चक्र गदा पद्मधारी श्री लक्ष्मी पुष्टिभ्यां युक्तः, अन्यतमः परिवर्त्तिकालीनः 875.1110 खीष्टाब्दमध्यवर्त्ती। इत्यनुमीयते। जयदेवस्य समये एतयोः माधवयोः मन्दिरद्वयमासीत्। तदा प्राचीनदीतीरे शतशतमाधवविग्रहाः शतशतमन्दिरेषु पूज्यन्ते स्म। प्राच्यपत्यकायां प्रति तीर्थस्थले शिवस्य।

लिंगरूपेण। विष्णोश्च। माधवरूपेण। मन्दिरद्वयमेकत्र विराजते इत्यस्य वैशिष्ट्यम्। केन्दुल्याः क्षुद्रपार्वतीमूर्त्याः जंघोपरि गणेश उपविष्टः, अम्बिकामन्दिरस्यानतिदूरे यूपस्तम्भद्वयस्य भग्नावशेषो विराजते। जनश्रुतत्यनुसारेण जयदेव स्तत्र यज्ञं करोति स्म। अद्यावधि प्रतिवर्षम् अक्षयतृतीयायां जयदेवस्य स्मृतौ तत्र यज्ञोऽनुष्ठीयते। ततोऽल्पदूरे चन्दनसरोवरो विद्यते। केन्दुलीग्रामस्य दक्षिणसीमायां नृसिंहमन्दिरं विद्यमानम्। एतत् गंगवंशीय चतुर्थनरसिंहदेवेन निर्मितमित्यनुमीयते। चतुर्थनरसिंहस्य कालः 1378–1406 खीष्टाब्दः स्यात्। केन्दुलीग्रामः श्रीजगन्नाथस्य ''अमृतमणोहि'' भूसंपत्तयन्तर्गतश्य भवति। चन्दनसरोवरस्य पंकोद्धारसमयोपलब्धताम्रशासनात् ज्ञायते यत् चतुर्थनरसिंहदेव, 1381 खीष्टाब्दे केन्दुविल्वशासननिकटे ''विजयनरसिंहपुरशासनं'' संस्थाप्य नृसिंहदेवस्य कृते एकं मन्दिरं निर्मितवान। केन्दुविल्वशासनस्य प्राय एकक्रोशदूरे प्रसिद्धः त्रिवेणीसंगमोऽवस्थितः। किम्बदन्त्यनुसारेण जयदेवः प्रत्यहं त्रिवेणीस्नानान्तरं तटावस्थितं त्रिवेणीमाधवं पूजयति स्म। अत्र त्रिवेण्यमावास्यायां माघमासे एका विशालयात्राऽनुष्ठीयते। त्रयोदशशतकरचित– कपिलसंहितायां त्रिवेणीतीर्थस्य वर्णना विद्यते।[15] केन्दुलीतः क्रोशद्वयदूरे कुशभद्रातीरे मधुकेशवरस्य मन्दिरं प्रथमानगंभीमदेवेन (1190–1198 ए.डी.) निर्मितमभूत् इति अभिलेखात् ज्ञायते। निकटवर्त्ति–अडशपुरग्रामे स्वप्नेश्वरमंदिरं, कुञ्जविहारिमन्दिरं, जैनमन्दिरं, शिवमन्दिरं च, रामेश्वरगडस्य रामेश्वरमन्दिरं, नीलकण्ठपुरस्य नीलकण्ठमन्दिरं नासिकेश्वरस्य नृत्येश्वरमन्दिरं, गुडवणैइ इत्यस्य नीलकण्ठेश्वरमन्दिरं, नरूआ इत्यस्य शंकरेशवरमन्दिरं, नूआसतांगस्य शंकरेश्वरमन्दिरं, कृष्णप्रसादगडस्य विश्वनाथमंदिरं पितापडाग्रामस्य अंगेश्वरमंदिरं, अमरप्रसादगडस्य अमरेश्वरमन्दिरं, लताहरणग्रामस्य ग्रामेश्वरमन्दिरं, जिउन्तुग्रामस्य इश्वरनाथमन्दिरं च उल्लेखयोग्यानि।[16] केन्दुविल्वशासनस्य पश्चिमभागे प्रथमनर– सिंहदेवनिर्मिते माणिकेश्वरमन्दिरे एकोऽभिलेखो विद्यते। समीपभागे चन्दनसरोवरपार्श्वे जटाजूटमण्डितस्य कौपीनधारिणः सन्यासिनो विग्रहः जयदेवस्येति जनश्रुतिरस्ति। निआलिशासनस्रू शोभनेश्वरमन्दिर–शिलालेखानुसारेण सामन्तब्राह्मणो वैद्यनाथः शोभनेश्वरमन्दिरं माधवग्रामस्य प्रसिद्धं माधवानन्दमंदिरं च निर्मितवान्। गजपतिप्रतापुरुद्रदेवः 1500 खीष्टाब्दे श्रीमन्दिरे गीतगोविन्दगानं बाध्यतामूलकं कृत्वा, केन्दुविल्वशासननिकटे प्रतापुरुद्रपुरं शासनं प्रतिष्ठाप्य जयदेवस्मृतिं प्रति सम्मानं ज्ञापितवान्।

## संदर्भाः


1. श्रीगीतगोविन्दमहाकाव्यम्–सर्वांगसुन्दी पृष्ठ–132 ए. डा. भगवानपन्डा।
2. श्रुतिरढनी, पृष्ठसंख्या–132।
3. गीतगोविन्दम्–निर्णयसागरप्रेससंस्करणम्–1937।
4. भक्तमाला–वेकेश्वर प्रेस मुम्बई सर्गः 41, पृष्ठ–61।
5. पी. भी. काणे धर्मशास्त्रेतिहासः, पृष्ठ–660।
6. भक्तविजय–निर्णयसागर प्रेस मुम्बई–1968 लखनऊ।
7. श्री श्री भक्तमाल–वसुमतीसाहित्यमन्दिर, कलिकता–1922।
8. श्रीजयदेव ओ श्रीगीतगोविन्द।
9. श्री चैतन्यचरितामृतम्–कृष्णदासकविराणः।
10. आदिलीला–13/42।
11. अन्त्यलीला–17/6।
12. वंगलासाप्ताहिक 'युगवाणी' 7 जून 1969 जयदेवप्रबन्धः।
13. उत्कलेषु संस्कृत गीतिकाव्य विकाश धारा, पृष्ठ–194।
14. कपिलसंहिता श्रीराधारमण पुस्तकालय पृष्ठ–105–106।
15. श्रीजयदेव ओ श्रीगीतगोविन्द–पृष्ठ–15।
16. तत्रैव, पृष्ठसंख्या–9।